दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघकृष्णदशमी
पौषः 29 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-82 | 1 | जनवरी 13, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 मादकद्रव्यं विरुद्धं कठोर- कार्यविधिं कर्तुं पुलिसस्य दायित्वम् - मुख्यमन्त्री हि.प्र.

3 HP Govt Administrative Transfers - हिमाचले प्रशासनिकं परिवर्तनं गंधर्वराठौरः उपायुक्तः हमीरपुरं नियुक्त

5 स्वामिविवेकानन्दकनिष्ठमहाविद्यालये अण्णासाहेब-डॉ.जी. डी. बेण्डाले- स्मृतिव्याख्यानं सम्पन्नम्


## प्रधानमन्त्री नरेन्द्रमोदी जर्मन जांसलर फ्रेडरिक मर्ज च गुजरात-राज्ये गांधीनगरे एकं उच्चस्तरीयं सम्मेलनं सहभागितवन्तौ



**हिमसंस्कृतवार्ताः -** प्रधानन्त्रिणा नरेन्द्रमोदिना प्रोक्त यत् भारत-जर्मनी देशयोः मध्ये द्विपक्षीय व्यापारः साम्प्रतं यावत् उच्चतम-स्तरे सम्प्राप्तः। प्रधानमन्त्री नरेन्द्रमोदी जर्मन जांसलर फ्रेडरिक मर्ज च गुजरात-राज्ये गांधीनगरे महात्मामंदिरे एकं उच्चस्तरीयं सम्मेलनं सहभागितवन्तौ। भारत-जर्मनी देशौ उद्घोषितवन्तौ यत् रक्षा, व्यापार प्रविधि क्षेत्राणि, रणनीतिक सम्बन्धाः च उपवेशनात् अस्मात् अग्रे सरिष्यन्ति । रक्षा औद्योगिक-सहयोगं सुदृढीकर्तुं उभौ देशौ सहविकास-सहउत्पादने च केन्द्रितं घोषणा-पत्रमेकं हस्ताक्षरिवन्तौ । एकं संयुक्त वार्ताहर सम्मेलनं सम्बोधयन् फ्रेडरिक मर्ज, प्रधानमन्त्री च भणिवन्तौ यत् भारत-जर्मनी देशौ केवलं आर्थिक-सहयोगिनौ न स्तः, वरन् वैश्विक शान्तये, स्थिरतायै च उभौ राष्ट्रौ प्रतिबद्धौ स्तः। अवसरेऽस्मिन् श्रीमोदी प्रतिपादितवान् यत् भारत-जर्मनी देशयोमध्ये रणनीतिक-व्यापारः उच्चतम स्तरं सम्प्राप्तः, साम्प्रतं इदं पञ्चाशत् अर्बुद्-डॉलर तः अधिकः जातः। श्रीमोदी भणितवान् यत् भारतदेशे द्वि-सहस्राधिक जर्मनी देशीय समवायाः दीर्घ-कालात् भारतदेशे कार्यरताः सन्ति। प्रधानमन्त्रिणा प्रतिपादितं यत् उभयोः देशयोः मध्ये प्राविधिक सहयोगः प्रतिवर्षं दृढ़तमः जातः। अद्य अस्य परिलक्षिता मूलाधारे अपि स्पष्ट रूपेण दरीदृश्यते । संक्षिप्त रूपेण जर्मन देशीय चांसलर-फ्रेडरिक-मर्ज वर्येण भणितं यत् उभौ देशौ स्वीय सम्बन्धाः उच्चतर-स्तरे आनेतुं प्रयासरतौ वर्तेते। इतः प्राक् उभौ नेतारौ अहमदाबादे ऐतिहासिक साबरमती आश्रमस्य यात्रा विहितवन्तौ। तत्र तौ राष्ट्रपितुः महात्म-गान्धिनः स्मृतिचिन्हे श्रद्धा कुसुमानि समर्पितवन्तौ । उभौ नेतारौ महात्मा गान्धिनः आत्मनिर्भरता-सत्य-अहिंसां च प्रति अपृथक-प्रतिबद्धता-युतान् मूल्यान् प्रति गभीरं सम्मानं प्रकाशितवन्तौ । उभौ नेतारौ साबरमती रिवरफ्रंट-स्थलं पतंग-महोत्सवेऽपि समाविष्टौ । श्री फ्रेडरिक मर्ज वर्यः गतप्रातः कालावधौ अहमदाबादे स्वीय द्वि-दिवसीय यात्रार्थं प्रधानमन्त्रिणः श्री नरेन्द्र मोदिनः आमन्त्रणे समागतः।

## सुभाषितम्

**अद्यैव कुरु यच्छ्रेयः,**
**वृद्धः सन्किं करिष्यसि।**
**स्वगात्राण्यपि भाराय,**
**भवन्ति हि विपर्ययेः।।**

अर्थात्- जो अपने कल्याण की बात है उसे आज ही करना अच्छा है, वृद्धावस्था में तो अपने अंग भी भार जैसे हो जाते हैं।


दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## ईरानेन सह संवादं कर्तुमिच्छामि-राष्ट्रपति डोनाल्डट्रंपः



ईराने प्रशासनं विरुध्य षोडश दिनेभ्यः देशव्यापी विरोध प्रदर्शनं प्रचलति। अमेरिका स्थितेन मानवाधिकार-कार्यकर्त्रा उक्तं यत् मृतकानां संख्या चतुश्चत्वारिंशदुत्तर-पञ्चशतं संवृत्ता । तत्र अन्तर्जाल सेवा दूरभाषा सेवा च बाधिते स्तः। अत्रान्तरे अमेरिकायाः राष्ट्रपतिना डोनाल्डट्रंपेण उक्तं यत् सः ईरानेन सह संवादं कर्तुमिच्छति।

### रक्तचाप-किडनी सम्बद्ध रोगेभ्यः ग्रस्तेभ्यः शीतलहर्य्याः प्रकोपः हानिकारकः-एम्स

अखिल-भारतीय-आर्युविज्ञान-चिकित्सा-विज्ञान-संस्थान एम्स इत्यनेन नवदिल्ल्यां स्वीय दिङ्ङ्गनिर्देशाः प्रसारिताः यत् ये रुग्णा रक्तचाप-किडनी सम्बद्ध रोगेभ्यः ग्रस्ताः सन्ति तेषां कृते शीतलहर्य्याः प्रकोपः हानिकारकः वर्तते। तेभ्यः समये-समये स्वीय स्वास्थ्य अन्वीक्षणं विधातव्यम्।

## रक्षा-अनुसन्धान-विकास-संघटननेन हैदराबादे गतिशील-लक्ष्ये उच्चस्तरीय-आक्रमण-क्षमता युतं मानव-पोर्टेबल-टैंक-रोधि-निर्देशितं प्रक्षेपास्तं सफलतया प्रक्षेपितम्।

**हिमसंस्कृतवार्ताः -** रक्षा-अनुसन्धान-विकास-संघटन-डी.आर.डी.ओ. इत्यनेन हैदराबादे गतिशील-लक्ष्ये उच्चस्तरीय-आक्रमण-क्षमता युतं मानव-पोर्टेबल-टैंक-रोधि-निर्देशितं प्रक्षेपास्त्रं सफलतया प्रक्षेपितम्। रक्षा मन्त्रिणा राजनाथ सिंहेन सफल परिक्षणाय डी.आर.डी.ओ. संघटनस्य सहयोगिभ्यः, उद्योग जगत-वैज्ञानिकेभ्यः शुभाशयाः प्रकटिताः।

### शिक्षायाः उपयोगः असमानतां न्यूनीकर्तुं करणीयः- उपराष्ट्रपतिः

उपराष्ट्रपतिना सी.पी. राधाकृष्णनेन उक्तं यत् शिक्षायाः उपयोगः असमानताः न्यूनीकर्तुं कोणस्थान् समुदायान् सशक्तं विधातुम् अथ विकासः देशस्य कोणेषु सुनेश्चेतुं करणीयः। राजधान्यां नवदिल्ल्यां जवाहरलाल नेहरू विश्वविद्यालयस्य नवम-दीक्षान्त समारोहं सम्बोधयन् उपराष्ट्रपतिः अवदत् यत् शिक्षा न केवलं चरित्र निर्माणं करोति मानसं बुद्धिं च दृढतां प्रददाति ।

## राष्ट्रिय-युवा दिवसः हर्षोल्लासेन आचरितः



गतदिवसे राष्ट्रीय युवा दिवसः आचरितः। दिवसोऽयं प्रतिवर्षं महान् आध्यात्मिक-नेतुः दार्शनिकस्य च स्वामिविवेकानन्दस्य जन्म जयन्त्याः अवसरे परिपाल्यते। अवसरे अस्मिन् राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी.पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्रमोदी च स्वामिनः जयन्त्यां तस्मै श्रद्धाञ्जल्यः समर्पितवन्तः । राष्ट्रपतिना प्रोक्तं यत् स्वामीविवेकानन्दः शाश्वतः, दूरदृष्टा, आध्यामिकता युतः महान् दार्शनिक नेता अवर्तत । उपराष्ट्रपतिना प्रोक्तं यत् स्वामी विवेकानन्देन स्वीय जीवने शिक्षायां च आन्तरिक शक्तिं, आत्म-अनुशासनं, निस्वार्थ सेवां च सार्थक-जीवनं च स्तम्भ रूपेण प्रतिपादितम्। प्रधानमन्त्रिणा आशा अभिव्यक्ता यत् राष्ट्रीय युवा दिवसः सर्वेषां देशवासिनां, विशिष्टतया युव-जनानां कृते नूतन-शक्तिः, नवीन-आत्मविश्वासः च आनयेत्। तेन भणितं यत् स्वामि-विवेकानन्दस्य व्यक्तित्वं तेषां कार्याणि च विकसित-भारतस्य कल्याणाय नूतन-ऊर्जायाः सञ्चारः करिष्यति।

## सतीश धवन अन्तरिक्ष-केन्द्र-श्रीहरिकोटातः पी.एस.एल.वी. सी 62 / ई.ओ.एस.एन 1 इत्याख्यम् अभियान् आरब्धं जातम्




**हिमसंस्कृतवार्ताः -** इसरो इत्यस्य ऐषमः प्रथमं प्रक्षेपणम् जातम्। इदं सतीश धवन अन्तरिक्ष-केन्द्र-श्रीहरिकोटातः पी.एस.एल.वी. सी 62 / ई.ओ.एस.एन 1 इत्याख्यम् अभियान् आरब्धं जातम्। एतत् भारतीयान्तरिक्ष-अनुसन्धान-संघटनस्य नवक्रमिकं विशिष्ट-वाणिज्यिकम् अभियानं विद्यते। अत्र चतुष्षष्टितमे प्रक्षेपणे प्राविधिक समस्या समागतास्ति । भारतीय-अन्तरिक्ष-अनसन्धान-संघटन-इसरो इत्यस्य अध्यक्षेण डॉ. वी. नारायणेन प्रोक्तं यत् सम्पूर्ण विवरणं विश्लेषितमस्ति ।

# मादकद्रव्यं विरुद्धं कठोर- कार्यविधिं कर्तुं पुलिसस्य दायित्वम् - मुख्यमन्त्री हि.प्र.



सोमवासरे शिमलायां आयोजितायां उच्चस्तरीयायां सभायां अध्यक्षतां कुर्वन् मुख्यमंत्री सुखविन्द्रसिंह- सुक्खु उक्तवान् यत् चिट्टाविरुद्धं कठोरां कार्यवाहीं कर्तुं पुलिसस्य दायित्वम् अस्ति। यदि पुलिसकर्मिण एव चिट्टा-गतिविधिषु संलिप्ताः स्युः, तर्हि एतादृशी कठोरा कार्यवाही अनिवार्या भवति। चिट्टातस्करी, अवैधव्यापारे च संलिप्तः कश्चन अपि व्यक्ति न क्षम्यते। चिट्टा-गतिविधिषु संलिप्तानां सर्वकारी- कर्मचारिणां विरुद्धं कठोर-कार्यवाही निरन्तरं क्रियते।

पुलिसमहानिदेशकः अशोकतिवारी पुलिसविभागस्य चिट्टाविरुद्ध- कार्यवाहीविषये विस्तृतां प्रस्तुतिं दत्तवान्। मुख्यमंत्री सर्वान् विभागान् निर्देशं दत्तवान् यत् चिट्टा-तस्करी चिट्टा-गतिविधिषु च संलिप्तानां सर्वेषां कर्मचारिणां विस्तृता प्रतिवेदना सिद्धा कृत्वा शीघ्रं मुख्यसचिवाय समर्प्यताम्।

## चिट्टातः उपार्जित-सम्पत्तेः प्रतिवेदनं सर्वकारे समर्पयितुं निर्देशाः

मुख्यमन्त्रिणा चिट्टातः उपार्जितायाः सम्पत्तेः प्रतिवेदनं सिद्धं कृत्वा सर्वकारे समर्पयितुं अपि निर्देशाः दत्ताः। सः अवदत् यत्- द्वि-ग्रामपर्यन्तं चिट्टाविषये सूचनायै १० सहस्ररूप्यकाणि, पञ्चग्रामपर्यन्तं २५ सहस्ररूप्यकाणि, पञ्चविंशतिग्रामपर्यन्तं ५० सहस्ररूप्यकाणि, एककिलोग्रामपर्यन्तं ५ लक्षरूप्यकाणि, एककिलोग्रामात् अधिकपरिमाणे चिट्टाविषये क् सूचनायै १० लक्षरूप्यकाणि पुरस्काररूपेण प्रदीयन्ते। महान् गिरोहविषये सूचनादातुः कृते पञ्चलक्षात् अधिकः पुरस्कारः प्रदीयते।

चिट्टासम्बन्धिनी काचिदपि सूचना प्रदातुं प्रदेशसर्वकारेण ११२ आपत्कालीन- दूरभाषसङ्ख्या आरब्धा अस्ति। जनान् सः आह्वानं कृतवान् यत् अस्यां विषये काचिदपि सूचना अस्ति चेत् अस्मिन् सङ्ख्यायां सम्पर्कं कुर्वन्तु। सभायां ग्रामीणविकास एवं पञ्चायतीराजमन्त्री अनिरुद्धसिंहः, मुख्यमन्त्रिणः प्रधान- परामर्शदाता रामसुभगसिंहः, मुख्यसचिवः संजयगुप्तः, अतिरिक्तमुख्यसचिवः के. के. पन्तः, मुख्यमन्त्रिणः सचिवः राकेशकंवरः, सचिवः सी. पालरासुः, महाधिवक्ता अनूप रतनः, निदेशकः ग्रामीणविकासः राघवशर्मा, अन्ये वरिष्ठ- अधिकारिणः उपस्थिताः आसन्।

## मुख्यमन्त्रिणा वाहनं हरित-ध्वजेन प्रेषितम्

मुख्यमंत्री सुखविन्द्रसिंह सुक्खु शिमलास्थितात् प्रदेश-सचिवालयात् भारत-भूटानयोः दीर्घकालात् प्रवर्तमानानां मैत्रीपूर्ण-सहयोगात्मक-सम्बन्धानां सुदृढीकरणाय भूटानाय चिलगोजा-वृक्ष-पौधाः उपहाररूपेण प्रेषितवान्। वाहनं हरितध्वजेन प्रेष्य सः अवदत् यत् एष प्रयासः भारत-भूटानयोः मैत्री, सौहार्दं, भ्रातृत्वं च प्रतीकं अस्ति। भविष्ये प्रदेश- वनविभागेन भूटानाय पञ्चलक्ष-रूप्यकमूल्यस्य चिलगोजा-बीजानि अपि प्रदास्यन्ते। भूटानस्य वनविभाग- अधिकारिभ्यः चिलगोजा-पौधोत्पादन- प्रशिक्षणम् अपि प्रदीयते। तेषां वनविभागस्य दलं शीघ्रमेव हिमाचलम् आगमिष्यति।प्रदेश-सर्वकार चिलगोजा-गतिविधिषु स्थानीय- महिला-मण्डलान् अपि सम्मिलयिष्यति। तेषां कृते आर्थिक-सहायतां च प्रदास्यति। पूर्वमपि भूटानाय ५० किलोग्रामपरिमाणस्य चिलगोजा-बीजानि प्रदत्तानि आसन्। चिलगोजा पश्चिम-हिमालयस्य बहुमूल्या प्रजातिः अस्ति, या पर्यावरण-संरक्षणेन, जैव-विविधतया, स्थानीय-जीविकया च घनिष्ठतया सम्बद्धा अस्ति।

## वन-संवर्धन-योजनाः

मुख्यमंत्री अवदत् यत् वर्तमान-प्रदेश-सर्वकार वनसंवर्धनाय अनेके प्रयासाः क्रियन्ते। राज्ये वन-आवरण- विस्ताराय च अनेका योजनाः सञ्चाल्यन्ते। सर्वकारस्य प्रयासैः वन-क्षेत्रं प्रायः ५५ वर्ग-किलोमीटर-परिमाणेन वर्धितम्। अस्मिन् वर्षे प्रायः ९,००० हेक्टेयर-वनभूमौ विविधयोजनाभिः पौधारोपणं क्रियते, यत्र ६० प्रतिशतं फलपादपाः सन्ति।

मुख्यमंत्री- वनविस्तारयोजना बञ्जर-पर्वतान् हरितान् कर्तुं प्रवर्तते। अस्यां योजनायाम् अद्यावधि ६०० हेक्टेयर-बञ्जरभूमौ पौधारोपणं सम्पन्नम्। वनरक्षणम् एवं प्रबन्धनाय २०१९ वनमित्राणि नियुक्तानि सन्ति, ये वृक्षारोपण, अग्निसुरक्षा, रालदोहन इत्यादिषु वानिकीकार्येषु प्रशिक्ष्यन्ते। प्रदेशसर्वकार जनसहयोगेन हरित-आवरणवृद्ध्यै निरन्तरं प्रयत्नशीलाऽस्ति। एतदर्थं राजीवगान्धी- वन-संवर्धनयोजना, ग्रीन- एडॉप्शन-योजना इत्यादयः योजनाः कार्यान्विताः सन्ति।

अस्मिन् अवसरे राजस्वमन्त्री जगतसिंहनेगी, उप-मुख्यसचेतकः केवलसिंह पठानिया, हिमाचलप्रदेश-राज्य- वननिगमस्य उपाध्यक्षः केहरसिंह खाची, विधायकौ कैप्टन रणजीतसिंहराणा, मलेंद्र राजनः, प्रदेश-हजसमितेः अध्यक्षः दिलदार अली भट्टः, महाधिवक्ता अनूप रतनः, अतिरिक्त-मुख्यसचिवः के. के. पन्तः, प्रधान मुख्य अरण्यपालः संजयसूदः तथा अन्ये वरिष्ठ-अधिकारिणः अपि उपस्थिताः आसन्।

## भारत-जर्मनी-देशाभ्यां महत्त्वपूर्णानि नवदश सन्धिपत्राणि हस्ताक्षरितानि




भारत-जर्मनी-देशाभ्यां महत्त्वपूर्णानि नवदश सन्धिपत्राणि हस्ताक्षरितानि। सममेव उभाभ्यां देशाभ्यां रक्षोद्यौगिक-सहयोगं दृढयितुम् अष्ट घोषणाः विहिताः। व्यापार-निवेशं समेधितुम् चीफ एग्जीक्यूटिव ऑफिसर्स फोरम इत्यस्य स्थापना अपि एतासु सम्मिलिता। वार्ताहर-सम्मेलनं सम्बोधयन् भारतीय विदेशसचिवः विक्रम मिसरी अवदत् यत् जर्मन चांसलर इत्यस्य भारतयात्रावधौ देशद्वयोः मध्ये महत्त्वपूर्ण संवादः अभवत्।

## फरवरी मासस्य प्रथमे दिने लोकसभायाम् आयव्ययसङ्कल्पनासत्रे चर्चा आरब्धा भविष्यति - ओम बिरला



**हिमसंस्कृतवार्ताः** - केन्द्रीयम् आयव्यय-सङ्कल्पनापत्रं रविवासरे फरवरी माससस्य प्रथमे दिने लोकसभायां प्रस्तोस्यते। संसदः आयव्यय-सङ्कल्पनासत्रम् अस्य मासस्य अष्टविंशतिः दिनाङ्के आरप्सस्यते। अप्रैलमासस्य द्वितीय दिनं यावत् चलिष्यति । राजधान्यां नवदिल्ल्यां वार्ताहर-सम्मेलने लोकसभाध्यक्षः ओम बिरला अवोचत् यत् फरवरी मासस्य प्रथमे दिने लोकसभायाम् आयव्ययसङ्कल्पनासत्रे चर्चा आरब्धा भविष्यति।

## प्राथमिक-कृषि-ऋण समितानां दृढ़तम-अन्तर्जाल-कारणात् भारतदेशः कस्यापि वैश्विक-आर्थिक संकटात् सम्मुखीकर्तुं सन्नधो वर्तते - भूपेन्द्र यादवः

**हिमसंस्कृतवार्ताः** - केन्द्रीय-कृषि-कृषक-कल्याण- मन्त्रिणा शिवराज सिंहचौहानेन युवनेतारः प्रतिबद्धतया अनुशासनेन च सह लक्ष्यं प्रापयितुं प्रोत्साहयत्। असौ अद्य नवदिल्ल्यां विकसित-भारत-युव-नेतृ-संवाद-कार्यक्रमं सम्बोधयति स्म। अपि च उक्तं यत् समर्पणं ध्यानम् आंतरिकशक्तिः च नेतृत्वाय आवश्यकाः गुणाः सन्ति। राष्ट्रनिर्माणे उद्देश्यपूर्णजीवनं सामूहिकोत्तरदायित्वम् अपि कृषिमन्त्रिणा सबलं प्रतिपादिते।

# पंचायतनिर्वाचने उच्चन्यायालयस्य निर्णयस्य अध्ययनं कुर्वन्नस्ति सर्वकारः - मुख्यमंत्री सुक्खुः

हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् राज्यसर्वकारः पंचायतनिर्वाचनसम्बद्धस्य उच्चन्यायालयस्य निर्णयस्य अध्ययनं कुर्वन् अस्ति। सः स्पष्टीकृतवान् यत् एप्रिल-मे-मासयोः मध्ये पंचायतीराजसंस्थानिर्वाचनं कर्तुं सर्वकारस्य अभिप्रायः पूर्वमेव अस्ति। सः कदापि न अवदत् यत् पंचायतनिर्वाचनं स्थगितव्यम् इति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः राज्यसचिवालये पत्रकारैः सह अनौपचारिकरूपेण भाषमाणः आसीत्। सः अवदत् यत् पंचायतीराजसंस्थाननिर्वाचनसम्बद्धे सर्वैः हितधारकैः सह सर्वकारः चर्चां कुर्वन् अस्ति, शीघ्रमेव निर्णयः क्रियते।

## अर्की-अग्निप्रकोपस्य घटनायां दुःखं प्रकटितवान्

सोलनमण्डलस्य अर्की-विपण्याः विशालाग्निप्रकोपस्य विषये सः दुःखं प्रकटितवान्। सः अवदत् यत् सः स्थानीयविधायकेन संजय अवस्थी इत्यनेन सह अस्य विषयस्य विषये दूरभाषेण भाषितवान्, सः निरन्तरं सम्पर्कं कुर्वन् अस्ति। सः अवदत् यत् अन्तः निरुद्धानां उद्धारः एव सर्वकारस्य प्राथमिकं कार्यम् । सः अवदत् यत् स्थानीयप्रशासनं तेभ्यः सर्वं सम्भवं साहाय्यं कर्तुं निर्दिष्टवान् तथा च प्रशासनं सहाय्यं कुर्वन् अस्ति। सः मृतानां परिवारेभ्यः तत्कालं सहायतां निर्दिश्य अस्य घटनायाः सम्यक् अन्वेषणं कर्तुं जिलाप्रशासनं आदेशं दत्तवान्।

# HP Govt Administrative Transfers - हिमाचले प्रशासनिकं परिवर्तनं गंधर्वराठौरः उपायुक्तः हमीरपुरं नियुक्तः

**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशसर्वकारेण भारतीयप्रशासनिकसेवायाः हिमाचलप्रदेशप्रशासनिकसेवायाश्च अधिकारिणां स्थानान्तरणस्य पदस्थापनस्य च आदेशाः कृताः, येन प्रमुखं प्रशासनिकं परिवर्तनं कार्यान्वितमस्ति। संशोधने सचिवालयात् जिलास्तरपर्यन्तं प्रमुखपदेषु परिवर्तनं समावेशितम् अस्ति।अमरजीतसिंहस्य उपायुक्त हमीरपुरतः सहकार्यसचिवः इति स्थानान्तरणं कृतम् अस्ति। सी. पॉलरासुः अस्मात् पदात् मुक्तः अस्ति । अमरजीतसिंहः अधुनैव सचिवपदे पदोन्नतः अभवत् । गन्धर्वराठौरः विशेषसचिवः कार्मिकपदं त्यक्त्वा हमीरपुरस्य उपायुक्तः नियुक्तः अस्ति। 2007 वर्गस्य आईएएस अधिकारी शैना◌ॅमोल ए. सचिव (प्रशासनिकसुधारः, प्रशिक्षणं, एफए एण्ड आरपीजी) नियुक्तः तत्सङ्गमे तस्यै शिमलामण्डदस्य आयुक्तस्य अतिरिक्तप्रभारः दत्तः अस्ति। सा पूर्वं सचिवस्य (आयुष) अतिरिक्तदायित्वं धारयति स्म । विनोदकुमारः कांगड़ामण्डलस्य आयुक्तात् सचिवः (तकनीकीशिक्षा) इत्मत्र स्थानांतरितः। सः काङ्ड़ा मण्डलायुक्तस्य अतिरिक्तप्रभारं निरन्तरं धारयिष्यति।

प्रतीक्षासूचौ आसीत् दलीपकुमारनेगी विशेषसचिवः (राज्यकरः आबकारी च) नियुक्तः अस्ति। तस्मै विशेषसचिवस्य (उद्योगः गृहं च) इति अतिरिक्तप्रभारः अपि दत्तः अस्ति । दिव्यांशुसिङ्गलः हिमाचलप्रदेशराज्यहस्तकरघा तथा हस्तशिल्पनिगमस्य प्रबन्धनिदेशकः नियुक्तः अस्ति । सः चिकित्सासेवानिगमस्य एमडी इत्यस्य अतिरिक्तप्रभारं अपि धारयिष्यति। नेत्रा मेटी एसडीएम पालमपुरतः नगर निगम आयुक्तः, पालमपुरम् नियुक्ता अस्ति। सा एसडीएम इत्यस्य अतिरिक्तप्रभारमपि धारयिष्यति। सचिन शर्मा एसडीएम अम्ब इत्यस्मात् अतिरिक्त उपायुक्त-सह-परियोजना निदेशकः (डीआरडीए), शिमला इति नियुक्तः। सचिवपदे पदोन्नतिं प्राप्तस्य सुदेशकुमारमोख्टा इत्यस्य स्थानान्तरणस्य आदेशः पृथक् निर्गतः भविष्यति। राज्यप्रशासनिकसेवायां परिवर्तनं कृत्वा मुख्यमन्त्रिणः अतिरिक्तप्रधाननिजीसचिवः राजीवकुमारः सूचनाजनसंपर्कविभागस्य निदेशकः च विशेषसचिवस्य (कार्मिकस्य) अतिरिक्तप्रभारं प्रदत्तम्, तदतिरिक्तं कतिपयानां प्रमुखविभागानाम् उत्तरदायित्वं दत्तम् अस्ति। कुलबीरसिंहः राणा उपायुक्तः (आश्रयः एवं पुनर्वासः), तलवाड़ा (राजा का तालाब) नियुक्तः। संजीतशर्मा इत्ययं थुनाग (मण्डी) इत्यस्य एसडीएम नियुक्तः अस्ति, रमेशकुमारं तु कार्मिकविभागे प्रतिवेदनं दातुं निर्देशः दत्तः अस्ति। सुमेध शर्मा स्वास्थ्यसेवायाः संयुक्तनिदेशकः नियुक्तः। गणेशठाकुरः संयुक्तायुक्त, नगरनिगमः, पालमपुरम् नियुक्तः अस्ति।

# हिमाचलप्रदेशेन भूटानदेशाय पाइन-नट-वृक्षाः उपहाररूपेण प्रदत्ताः




**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः राज्यसचिवालयात् शिमलातः भूटानदेशाय पाइन- नटवृक्षाणाम् उपहारं प्रदत्तवान्, येन भारत-भूटानयोः दीर्घकालीन- मैत्री- सहकार- सम्बन्धः अधिकं सुदृढः अभवत् यानं हरित्ध्वजं प्रदर्श्य प्रेषयित्वा मुख्यमन्त्री अवदत् यत् एष उपक्रमः भारतस्य भूटानस्य च मैत्री, सौहार्दपूर्णता, भ्रातृत्वस्य च प्रतीकम् अस्ति। सः अवदत् यत् भविष्ये हिमाचलप्रदेशस्य वनविभागेन भूटानदेशाय पञ्चलक्षरूप्यकाणां अतिरिक्तं पाइननटबीजानि अपि प्रदास्यते। राज्यसर्वकारः भूटानदेशस्य वनविभागस्य अधिकारिभ्यः पाइननट- वृक्षाणां वर्धनविषये प्रशिक्षणमपि प्रदास्यति। एतदर्थं शीघ्रमेव भूटानस्य वनविभागस्य दलं हिमाचलं आगमिष्यति। राज्यसर्वकारः स्थानीयमहिलासमूहान् पाइननट क्रियाकलापयोः अपि सम्मिलितं करिष्यति, तेभ्यः आर्थिकसहायतां च प्रदास्यति। मुख्यमन्त्री उक्तवान् यत् पूर्वं भूटानदेशाय ५० किलोग्रामं पाइन-नट्स बीजं प्रदत्तम् अस्ति। पाइन-नट्स पश्चिमहिमालयस्य बहुमूल्यं प्रजातिः अस्ति, या पर्यावरणसंरक्षणेन, जैवविविधतायाः, स्थानीयजीविकायाः च गहनतया सम्बद्धा अस्ति।मुख्यमंत्री सुक्खुः अवदत् यत् वर्तमानराज्यसर्वकारः वनसंरक्षणार्थं अनेकान् उपक्रमान् कुर्वन् अस्ति, राज्ये वनव्याप्तेः विस्तारार्थं अनेकाः योजनाः कार्यान्विताः सन्ति। सर्वकारस्य प्रयत्नस्य कारणेन वनक्षेत्रं प्रायः ५५ वर्गकिलोमीटरमिततं वर्धितम् अस्ति। अस्मिन् वर्षे विभिन्नयोजनाभिः परियोजनाभिः च प्रायः ९,००० हेक्टेयर् वनभूमिः रोप्यते, येषु ६० प्रतिशतं फलवृक्षाः सन्ति।ऊसरपर्वतानां हरितीकरणस्य उद्देश्यं कृत्वा मुख्यमन्त्री वनविस्तारयोजना कार्यान्विता भवति। एतावता अस्याः योजनायाः अन्तर्गतं ६०० हेक्टेयर ऊसरपर्वतेषु वृक्षाणां रोपणं कृतम् अस्ति। वनानां रक्षणाय, प्रबन्धनाय च २०१९ तमस्य वर्षस्य वनमित्राणां नियुक्तिः कृता अस्ति, येषां प्रशिक्षणं वृक्षरोपणं, अग्निसुरक्षा, रालनिष्कासनं च इत्यादिषु विविधेषु वनकार्येषु क्रियते राज्यसर्वकारः जनसहकारेण हरितावरणं वर्धयितुं निरन्तरं प्रयतते। एतदर्थं राजीवगान्धीवनसंरक्षणयोजना, हरितदत्तकयोजना च इत्यादयः अनेकाः योजनाः कार्यान्विताः सन्ति।

# हिमाचलप्रदेश- सर्वकारस्य महत्त्वपूर्णा कार्यविधिः, मादकद्रव्यं (चिट्टा) गतिविधिषु संलिप्ताः ११ पुलिसकर्मिणः सेवातः बहिष्कृताः

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेश-सर्वकारेण मादकद्रव्यं (चिट्टा)- विरुद्धं कठोरां कार्यवाहीं कृत्वा सोमवासरे ११ पुलिसकर्मिणः सेवातः बर्खास्ताः कृताः। एतेषां कर्मिणां विरुद्धं एषा कार्यवाही प्रदेश-सर्वकारस्य चिट्टा, नशाविरुद्ध- शून्यसहिष्णुतानीतेः अनुरूपा, एनडीपीएस- अधिनियमस्य प्रकरणेषु संलिप्ताः इति प्रमाणिताः सन्ति इति कारणेन कृता। एषा कार्यवाही भारतीयसंविधानस्य अनुच्छेद ३११ (२) (ख) अन्तर्गतं कृता अस्ति। एषा कार्यवाही स्पष्टं कठोरं च सन्देशं ददाति यत्- यः कानूनस्य रक्षणं करोति तस्मिन् पुलिसबले कानून-भङ्गकर्तॄणां कृते स्थानं नास्ति।

# मण्ड्यां निजीबसयानस्य दुर्घटना एका महिला मृता, चत्वारः यात्रिकाः घातिताः




**हिमसंस्कृतवार्ताः- मण्डी।** मण्डी-जनपदस्य चरखडीस्थाने एका बृहत् दुर्घटना अभवत्। निजीबसदुर्घटनायां ७५ वर्षीया महिला मृता, चत्वारः यात्रिकाः च घातिताः। घातितानां चिकित्सायाम् पाङ्ना-चिकित्सालये प्रवेशः कारितः। प्रारम्भिकसूचनानुसारं निजीबसयानस्य चालकः परिचालकः च अधुना एव बसयानं प्रारब्धवन्तौ, यात्रिकाणां प्रतीक्षां कुर्वन्तौ आस्ताम्, तदा सहसा बसयानं चलितम्, पतितम् च। अस्यां दुर्घटनायां कलावती इति ७५ वर्षीयायाः महिलायाः मृत्युः अभवत्। क्षतिग्रस्तानां मध्ये एकः लघुः बालकः, तिस्रः महिलाः च सन्ति। एकः घातितः झुगी चिकित्सालयं नीतः। पुलिसदलम् अस्य विषयस्य अन्वेषणं कुर्वन् अस्ति। सर्वे आहताः १०८ एम्बुलेन्सद्वारा चिकित्सायै चिकित्सालयं नीताः।

बसयानस्य पतनस्य अनन्तरं स्थानीयनिवासिनः उद्धारकार्यं कृत्वा एम्बुलेन्सद्वारा आहतानाम् चिकित्सालयं प्रेषितवन्तः। दुर्घटनायाः कारणम् अद्यापि न ज्ञायते। आहताः केवलं वक्तुं शक्नुवन्ति स्म यत् बसयानं सहसा गन्तुं आरब्धम् ततः सानुतः अधः आवर्त्य दुर्घटितम् अभवत्। इयं मार्गदुर्घटना बीएसएल- पुलिसस्थानकस्य अधिकारक्षेत्रे चरखड़ीक्षेत्रे अभवत्। गर्ते यत् बसयानं पतितं स्म तत् निजी आसीत्। चत्वारः पञ्च जनाः घातिताः अभवन्। एकस्याः महिलायाः स्थितिः गम्भीरा आसीत्, सा चिकित्सालये एव मृता। जनाः एम्बुलेन्सस्य साहाय्येन घातितान् चिकित्सालयं प्रेषितवन्तः।

# कोलबन्धजलाशये कारयानं पतितम्, द्वौ युवकौ मृतौ

हिमसंस्कृतवार्ताः- सुन्दरनगरम्। सुन्दरनगरपुलिसस्थानकस्य अन्तर्गतं सलापड़ पुलिसचौकीक्षेत्रे निर्माणाधीनसलापड़- तत्तापानीमार्गे मुनाली-उपनदस्य समीपे एका दुःखदा दुर्घटना अभवत्। एकं कारयानं नियन्त्रणात् बहिः गत्वा कोलबन्धजलाशये पतित्वा याने स्थितौ युवकौ स्थले एव मृतौ। मृतकौ बाबूरामः (29 वर्ष) पुत्र नगिनचन्दः तथा मुंशीरामः (25 वर्ष) पुत्रः कुलदीपसिंहः, उभौ ग्राम पंजोलठ, डाकघर बटवाड़ा, तहसील सुन्दरनगरम्, मंडीजनपदस्य निवासिनौ आस्ताम्। दुर्घटनापश्चात् उभौ शवौ प्राप्य शवपरीक्षायै सिविलचिकित्सालये नीतौ।

सूचनां प्राप्य सलापड़पुलिसकेन्द्रस्य डीएसपी सुन्दरनगरभारतभूषणस्य नेतृत्वे एनडीआरएफ-कर्मचारिणः च दलं तत्स्थानं प्राप्य कारमध्ये स्थितानां जनानाम् अन्वेषणं कर्तुं आरब्धवान् बहु परिश्रमं कृत्वा जलाशयात् उभयोः युवकयोः शवौ प्राप्तौ। एसपी मण्डी साक्षीवर्मा इत्यनया एतस्याः घटनायाः पुष्टिः कृता तथा च उक्तं यत् अस्मिन् विषये प्रकरणं पञ्जीकृतम् अस्ति। दुर्घटनायाः कारणस्य सम्यक् अन्वेषणं क्रियते।

विधायकः सुन्दरनगरम् राकेशजमवालः समाजसेवी अभिषेकठाकुरः अस्यां नदुर्घटनायां गभीरंशोकं प्रकटितवन्तौ अस्याः दुःखदघटनायाः कारणात् अस्मिन् क्षेत्रे शोकस्य तरङ्गः अस्ति

# देहरादूनस्थया उत्तराखण्डविद्वत्सभया (पञ्जी.) संस्कृतभारतीदेहरादूनस्य कार्यकर्तॄणां विशिष्टं सम्माननम्




**हिमसंस्कृतवार्ताः- सेलाकोई, देहरादूनम्।**
संस्कृतभाषायाः, श्रीमद्भगवद्गीतायाः अथ भारतीयसांस्कृतिकमूल्यानां संरक्षणसंवर्धनयोः उद्देश्येन उत्तराखण्डविद्वत्सभा (पञ्जी.), देहरादूनस्थया, श्रीमायादेवीविश्वविद्यालयः, सेलाकोई, संस्कृतभारती देहरादूनम् इत्येतयोः संयुक्ततया गीताप्रतियोगिता, संस्कृतसम्मेलनं सम्मानसमारोहश्च भव्यतया गरिमया च आयोजितः। कार्यक्रमः अत्यन्तं प्रेरणादायकः, संस्कृतनिष्ठः, सांस्कृतिकवातावरणे सम्पन्नोऽभवत्।कार्यक्रमस्य शुभारम्भः मंचासीनानाम्-अतिथीनां स्वागतं, मंगलाचरणं, दीपप्रज्वलनं च कृत्वा अभवत्। अस्मिन् अवसरे संस्कृतस्य, श्रीमद्भगवद्गीतायाः भारतीयजीवनमूल्यानां च प्रचारप्रसारे विशिष्टं बलं दत्तम्। कार्यक्रमाध्यक्षतां वहन् उत्तराखण्डविद्वत्सभायाः अध्यक्षः हर्षपति गोदियालमहोदयः अवदत् यत् "गीता सुगीता कर्तव्या" इति संकल्पस्य जन- जनपर्यन्तं प्रचाराय एतादृशाः प्रतियोगिताः सम्मेलनानि च अत्यावश्यकानि सन्ति। एतेन विद्यार्थिषु युवसु च संस्कृतगीतान् प्रति स्वाभाविकः अनुरागः जायते। गीता-प्रतियोगितायां संस्कृतवर्गे प्रथमस्थानं हरिओम पाण्डेयः, द्वितीयस्थानं कार्तिक देवराणी,तृतीयस्थानं अनमोल बलूनी (परशुराम- चतुर्वेद- विद्यालयः, खुरबुड़ा, देहरादून) इत्येते प्राप्तवन्तः।
आधुनिकवर्गे प्रथमस्थानम् अवीशा अरोड़ा (यूनिवर्सल अकादमी, देहरादून), द्वितीयस्थानं रुचि-जोशी (अटल- उत्कर्ष- राजकीय- इण्टर- कॉलेज, छिद्दरवाला), तृतीयस्थानं दिव्यांशी सेमवालः (श्रीगुरुरामरायविद्यालयः, बालावाला, देहरादूनम् ) इत्येते प्राप्तवन्तः।अस्याः प्रतियोगितायाः कृते पञ्चाशताधिकाः विद्यार्थिनः पञ्जीकृताः, तेषु प्रायः नवतिशतप्रतिशतं विद्यार्थिनः सहभागितां कृतवन्तः।श्रीमायादेवी- विश्वविद्यालयस्य संस्थापकाध्यक्षः श्रीमनोहरलाल जुयालं कर्मयोगिनम् इति निरूप्य सभया तस्य सहयोगाय कृतज्ञता प्रकटिता। विश्वविद्यालयस्य कुलपतिः डॉ आशीष सेमवालः उपाध्यक्षश्च डॉ तृप्ति सेमवाल जुयालः पुरस्कारराशेः, भोजनस्य, कार्यक्रमस्थलस्य च व्यवस्थां कृत्वा उत्तराखण्डविद्वत्सभां उपकृतवन्तौ। तयोः कृते "धर्मार्थं वित्तं यस्य वरं तस्य निरीहता" इति वाक्येन साधुवादः ज्ञापितः।
कार्यक्रमस्य मुख्यवक्ता डॉ रामभूषण विजल्वाणः गीतायाः संस्कृतस्य च दार्शनिकं नैतिकं व्यावहारिकं च पक्षं विषये ओजस्विनः विचारान् व्यक्तवान्, प्रतिदिनं द्वयोः श्लोकयोः स्वाध्यायं कर्तुं च आग्रहं कृतवान्। सः संस्कृतभारती देहरादूनस्य विविधाः गतिविधयः अपि विस्तरेण परिचितवान्।सभायाः सारस्वतातिथिः वेदप्रकाशशर्मा पत्रकारितामाध्यमेन संस्कृतप्रचारस्यआवश्यकतां प्रतिपादयन् कार्यक्रमं प्रथमपृष्ठयोग्यं मन्यताम् अकरोत्, उपस्थितेभ्यः च 'संस्कृतसंवाद' इत्यस्य प्रतीः प्रदत्तवान्। मञ्चसञ्चालनं मुख्यसंयोजनं च उत्तराखण्ड- विद्वत्सभायाः महासचिवः अजय डबरालः धीरजमैठाणी च अकुरुताम्। प्रतियोगितायां नागेन्द्रदत्तव्यासः, डॉ. नवीन जसोला, डॉ. प्रदीपसेमवालः च निर्णायकत्वेन कार्यं निर्व्यूढवन्तः। अस्मिन् अवसरे यज्ञरत्न नित्यानन्द सेमवालस्य परतया तदीयः आचार्यः प्रशान्तसेमवालः प्रतिभागिभ्यः अङ्गवस्त्राणि प्रदत्तवान्। योगाचार्यः विपिन जोशी कर्मयोगस्य व्याख्यां कुर्वन् समर्पणं भगवत्प्राप्तेः मार्गः इति प्रतिपादितवान्। तेन सर्वेऽपि ज्ञानानन्दमहाराजस्य कथायां समाहूताः चतुर्दशे दिनांके। संस्कृतभारती देहरादूनस्य कार्यकर्तारः संगठनसेवायाः कृते प्रशस्तिपत्रैः अङ्गवस्त्रैः च सम्मानिताः। तेषु विभागसंयोजकः नागेन्द्र व्यासः, सहविभागसंयोजकः डॉ. नवीन जसोला, जिलाध्यक्षः डॉ. रामभूषण विजल्वाणः, जनपदमन्त्री प्रदीपसेमवालः, अल्मोड़ा जनपदमन्त्री डॉ. महेशचन्द्र मासीवालः, गीताशिक्षणप्रमुखः योगेश कुकरेती, सम्पर्कप्रमुखः धीरजमैठाणी, महानगरमन्त्री माधव पौडेलः, डोईवाला खण्डसंयोजकः डॉ. आनन्द जोशी, रायपुर- खण्डसंयोजिका नीतिश मैठाणी, सहखण्डसंयोजिका डॉ. बीना इत्येते प्रमुखाः आसन्।अवसरे अस्मिन् उत्तराखण्डविद्वत्सभायाः उपाध्यक्षः सत्यप्रसाद सेमवालः, सहसचिवः मुरलीधर सेमवालः, प्रवक्ता विपिन डोभालः, कोषाध्यक्षः आदित्यराम थपलियालः, संगठनसचिवः राजेश अमोली, लेखानिरीक्षकः दीपक अमोली, परशुराम उनियालः, नीरज गोदियालः, सुभाष चमोली, सुनील डबरालः, रामचन्द्र ममगाईं, कवीन्द्र सेमवालः, कृष्णानन्द नौडियालः, पवन बौड़ाई, विकासभट्टः, अभिषेक ममगाईं, कमलेश नैनवालः, कमलेश उनियालः, महेन्द्र थपलियालः च सहितं अनेके विद्वांसः, शिक्षकाः, अभिभावकाः, संस्कृतानुरागिणः च उपस्थिताः आसन्। अन्ते सर्वे प्रतिभागिनः प्रमाणपत्रैः, अङ्गवस्त्रैः, 'वदतु संस्कृतम्' नामकपुस्तकेन, 'संस्कृतसंवाद' इत्यस्य प्रत्या च सम्मानिताः। कार्यक्रमस्य समापनं सामूहिकचित्रेण शान्तिपाठेन च अभवत्। अयं आयोजनः संस्कृतस्य श्रीमद्भगवद्गीतायाः च प्रति जनजागरणं कृत्वा "गीता सुगीता कर्तव्या" इति संकल्पं सुदृढीकृतवान्।

# ओडिशाराज्ये एनटीपीसी, दार्लिपाल्याम् बालभारती पब्लिकविद्यालये समायोजितः राष्ट्रीययुवादिवसः




**हिमसंस्कृतवार्ताः-सौरभः दे ।** ओडिशाराज्ये एनटीपीसी, दार्लिपाल्याम् बालभारती पब्लिकविद्यालये, इत्यत्र १२ जनवरी २०२६, सोमवारदिने, समन्वित-अध्ययनस्य भागरूपेण, महता उत्साहेन श्रद्धया च राष्ट्रीय- युवादिवसः आचरितः। अस्य कार्यक्रमस्य उद्देश्यं स्वामी विवेकानन्दस्य जन्मजयन्ती- स्मरणं, छात्राणां महान् स्वप्नान् द्रष्टुं, कठोरं परिश्रमं कर्तुं, राष्ट्रसेवायां निष्ठां, समर्पणं च वर्धयितुम् आसीत्। अयं कार्यक्रमः SDG ४ (गुणवत्तापूर्ण-शिक्षा) इत्यस्य अनुरूपेण मूल्याधारितशिक्षां प्रोत्साहितवान्। दिवसस्य आरम्भः विद्यालयस्य उद्यानप्रदेशे प्रातःकाले सम्पन्नेन प्रार्थनासभया अभवत्, यत्र छात्राः अध्यापकाः च प्रकृतेः सान्निध्ये समवेताः। शान्ति- बल- बुद्धि- प्राप्त्यर्थं विशेषा प्रार्थना कृता, येन परस्पर-सौहार्दं, सद्भावः च सुदृढीकृतः। एषा क्रिया SDG १६ (शान्तिः, न्यायः, सुदृढ- संस्थाः) इत्यस्य भावनां सम्यक् प्रतिबिम्बितवती। अस्मिन् पावने अवसरे स्वामी विवेकानन्दरूपेण सुसज्जितः एकः छात्रः शिकागो- सभायां प्रदत्तं प्रसिद्धं भाषणं अभ्यपठत्, यत्र विश्वबन्धुत्वं, सहिष्णुता च विशेषतः प्रतिपादिते। अपरः छात्रः स्वामी विवेकानन्दस्य जीवनचरित्रं तथा राष्ट्रीय- युवादिवसस्य महत्त्वं विवृण्वन् राष्ट्रनिर्माणे युवानां महत्त्वपूर्णां भूमिकां, उत्तरदायी- नागरिकत्वं प्रकाशयत्। ततः सामूहिक-सूर्यनमस्कार- अभ्यासः आयोजितः, येन शारीरिक-स्वास्थ्यं, मानसिक- अनुशासनं, प्रकृत्या सह सामञ्जस्यं च सूचितम्। अनेन छात्राणां अध्यापकानां च स्वास्थ्यकर- जीवनशैली, भावनात्मक- कल्याणं च प्रोत्साहितम्, यत् SDG ३ (उत्तम-स्वास्थ्यं च कल्याणम्) SDG १५ (भूमेः जीवन- संरक्षणम्) इत्यस्य भावनायाः अनुरूपम् आसीत्। तदनन्तरं विद्यालयस्य प्राचार्या उन्नति जोशी राउत् महोदया सभां सम्बोध्य राष्ट्रीय- युवादिवसस्य हार्दिकाः शुभाशयाः प्रेषितवती। सा स्वामी विवेकानन्दस्य आदर्शानां अद्यतन-समाजे प्रासङ्गिकतां सुशब्दैः विवृण्वती छात्रान् आत्मविश्वास-विकासाय, दृढ-चरित्रनिर्माणाय, सामाजिक-दायित्वबोधाय च प्रेरितवती। एतेन छात्राः अध्यापकाः च सामूहिक-भागीदारीद्वारा SDG ४ (गुणवत्तापूर्ण-शिक्षा) SDG १७ (लक्ष्य- सहभागिता) इत्यस्य पूर्तौ प्रेरिताः। अनन्तरं स्वामी विवेकानन्दविषयकं सुन्दरं चलचित्र- दृश्यं प्रदर्शितम्। जिलाधिकारी- कार्यालयस्य ब्लॉक- कार्यालयस्य (लेफ्रिपारा, ओडिशा) निर्देशनानुसारं स्वदेशी- संकल्पप्रतिज्ञा श्रद्धया स्वीकृता। कार्यक्रमस्य समापनं देशभक्तिगीतस्य "वन्दे मातरम्" इत्यस्य सामूहिक-गायनेन अभवत्।अयं कार्यक्रमः छात्राणां कृते न केवलं राष्ट्रीय-युवादिवसस्य उत्सवः आसीत्, अपि तु स्वामी विवेकानन्दस्य शाश्वत-उपदेशान्, आदर्शान् च चिन्तयितुम् एकं सार्थकं मञ्चं प्रदत्तवान्।

# स्वामिविवेकानन्दकनिष्ठमहाविद्यालये अण्णासाहेब-डॉ.जी. डी. बेण्डाले-स्मृतिव्याख्यानं सम्पन्नम्





डॉ.आलोकः,जलगांव(महाराष्ट्र-राज्यम्) , दिनाङ्कः १२ : खान्देश-कालेज्-एज्युकेशन-सोसायटी-सञ्चालिते स्वामिविवेकानन्दकनिष्ठमहाविद्यालये स्वामिविवेकानन्द-जयन्त्यवसरे अण्णासाहेब-डॉ.जी. डी. बेण्डाले-स्मृतिव्याख्यानम् अत्यन्तं हर्षोल्लासेन प्रेरणाप्रदवातावरणे च सम्पन्नम्। युवकानां मध्ये राष्ट्रीयमूल्यानां, चारित्र्यस्य, आत्मविश्वासस्य तथा सामाजिकबोधस्य संवर्धनाय अस्य व्याख्यानस्य आयोजनं कृतम् आसीत्।अस्मिन् प्रसङ्गे प्रसिद्धः विचारवेत्ता वक्ता च डॉ.पराग जहागिरदारः “स्वामिविवेकानन्दः अद्यतनयुवकश्च” इति विषये सगम्भीरं प्रभावशालीं च मार्गदर्शनं कृतवान्। स्वामिविवेकानन्दस्य विचाराः केवलं ऐतिहासिकाः न सन्ति, अपि तु अद्यतनयुगेऽपि अत्यन्तं उपयुक्ताः दिशादर्शकाः च सन्तीति सः अवदत्।डॉ.जहागिरदारः अग्रे अवदत् यत् स्वामिविवेकानन्देन युवकः राष्ट्रनिर्माणस्य केन्द्ररूपेण निरूपितः। चारित्र्यसंवर्धनं, शारीरिकमानसिकबलविकासः तथा ज्ञानसम्पादनम्—एषा त्रिसूत्री आश्रित्य यदि युवकाः जीवनं यापयन्ति, तर्हि ते स्वस्य समाजस्य च सर्वाङ्गीणविकासं साधयितुं समर्थाः भवन्ति। शिक्षणेन चेतना जायते, सा चेतना यदि युवकानां मध्ये जागरिता भवति तर्हि एव राष्ट्रस्य सर्वाङ्गीणविकासः सम्भवति इति तेन प्रतिपादितम्।
स्वामिविवेकानन्दस्य वैज्ञानिकदृष्ट्या प्रतिपादितेन तत्त्वज्ञानेन भारतस्य नाम विश्वपटले गौरवेन अंकितम् इति सः अवदत्। सहिष्णुता, सर्वसमावेशकता तथा मानवतावादः—एते भारतीयसंस्कृतेः वैशिष्ट्यभूताः घटकाः सन्ति। एतान् मूल्यान् विश्वे प्रसारितवान् स्वामिविवेकानन्दः, येन तस्य जीवनं नूतनं आयामं प्राप्तम् इति अपि सः सूचितवान्। अद्यतनसामाजिकपरिस्थितौ एतेषां विचाराणां महती आवश्यकता वर्तते इति तेन स्पष्टं कृतम्।कार्यक्रमस्य अध्यक्षतां मू. जे. महाविद्यालयस्य प्राचार्यः डॉ.एस्. एन्. भारम्बेः अलङ्कृतवान्। अध्यक्षीयभाषणे तेन उक्तं यत् युवकः समाजस्य मेरुदण्डः अस्ति। युवकैः नूतनसंकल्पान् कृत्वा शिस्त्या राष्ट्रभक्त्या च भारतीयसमाजस्य निर्माणे योगदानं दातव्यम्।अस्मिन् एव अवसरे जिल्ला-विधिसेवा-प्राधिकरणस्य सदस्या सहाय्यकलोकाधिरक्षिका च अॅड. शिल्पा रावेरकरा जिल्हाविधिसेवा-प्राधिकरणेन नागरिकानां कृते उपलब्धानां निःशुल्कविधिसहाय्यायाः, न्यायालयीनसाहाय्यस्य विविधयोजनानां च विषये विस्तृतां जानकारीं दत्तवती।कार्यक्रमे व्यासपीठे उपप्राचार्यः प्रा. आर्. बी. ठाकरेः, पर्यवेक्षिका प्रा. स्वाती बऱ्हाटे, समन्वयकः प्रा. उमेश पाटीलः तथा कार्यक्रमसमितेः अध्यक्षः प्रा. गणेश सूर्यवंशी उपस्थिताः आसन्।स्वामिविवेकानन्दस्य, माँसाहेब-जिजाऊमहिलायाः तथा अण्णासाहेब-डॉ.जी. डी. बेण्डालेमहाशयस्य प्रतिमानां माल्यार्पणं दीपप्रज्वलनं च कृत्वा कार्यक्रमस्य शुभारम्भः अभवत्। प्रास्ताविकं प्रा. गणेश सूर्यवंशी इत्यनेन कृतम्। कार्यक्रमस्य सूत्रसञ्चालनं धन्यवादप्रदर्शनं च डॉ.श्रद्धा पाटील इत्यनया कृतम्।अस्य कार्यक्रमस्य सफलतायै प्रा. हेमन्त पिंपळे, प्रा. दीपक चौधरी, प्रा. संध्या महाजन, प्रा. संदीप वानखेडे, प्रा. पल्लवी फिरके, प्रा. स्वप्निल धांडे, प्रा. संदीप गव्हाळे, श्री. विजय जावळे तथा श्री. चेतन वाणी इत्येतेषां विशेषं सहकार्यं लाभ्यम्। कार्यक्रमे छात्राः, अध्यापकाः तथा शिक्षकेतरकर्मचारिणः बहुसंख्यया उपस्थिताः आसन्।

# "लौकिकन्यायकोशः"

## "पुष्टलगुडन्यायः"

शुनकसमूहे एकस्य ताडनार्थं स्थापितः पुष्टलगुडः अन्येषामपि ताडनार्थम् उपयुक्तो भवति खलु? एवम् एकस्य खण्डनाय कृता बलवती युक्तिः अन्येषामपि तादृशानां खण्डने उपयुक्ता स्यादिति भावः।

डॉ.वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

नन्दिनीः नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्याः नमस्ते नन्दिनि। अद्य प्रथमा वार्ता सिंहपुरात् आगता अस्ति। एकेन भारतीय-तन्त्रज्ञेन तत्र गत्वा महदाश्चर्यम् अनुभूतम्।
नन्दिनीः आश्चर्यम्? तेन तत्र किं दृष्टम्?
काव्याः तेन दृष्टं यत् तत्र लक्षाधिपतयः अपि रेल्यानेन गच्छन्ति। भारतदेशे तु धनिकाः कार-यानम् एव इच्छन्ति, अतः इदं तेन 'सांस्कृतिक-आघातः' इति मतम्।
नन्दिनीः सत्यम्। तेन प्रदूषणम् अपि न्यूनीकृतम्। इदानीं का अन्या वार्ता?
काव्याः इयं वार्ता चीन-देशात् आगता अस्ति। एका महिला वाहन-दुर्घटनायाम् आसीत्। तया तत्र स्वीय-अङ्गानि नष्टानि।
नन्दिनीः अतीव दुःखदायकम्। ततः तया किं कृतम्?
काव्याः तया पराजयः न स्वीकृतः। तया एकः उद्यमः आरब्धः। तत्र तया दिव्याङ्गेभ्यः तेषां सामर्थ्यम् अनुसृत्य कार्यं दत्तम्।
नन्दिनीः एषा तु उत्तमा प्रेरणा। दिव्याङ्गाः अपि समर्थाः भवन्ति। अन्या वार्ता का?
काव्याः चीन-देशे एव, एकेन छात्रेण मित्राणि पारम्परिक-चिकित्सया उपचरितानि। तेन प्राचीन-विद्या दर्शिता।
नन्दिनीः साधु। प्राचीन-ज्ञानं तु सदा बहुमूल्यम्। यूरोप-खण्डस्य कापि वार्ता अस्ति वा?
काव्याः आम्। 'नेदरल्याण्ड'-देशे एकया भारतीय-युवत्या अग्निशामकानां चातुर्यं दृष्टम्। तैः एकः रोगी वातायनात् 'क्रेन'-यन्त्रेण बहिः आनीतः।
नन्दिनीः अहो! विचित्रा पद्धतिः। किन्तु तैः प्राण-रक्षा कृता, तत् प्रशंसनीयम्।
काव्याः आम्। आपत्काले सर्वः उपायः करणीयः भवति। अद्यतनाः वार्ताः अत्रैव समाप्ताः।
नन्दिनीः श्वः पुनः नूतन-वार्ताभिः सह आगमिष्यावः। तावत् पर्यन्तं शुभं भवतु। नमो वः।

# मकरसंक्रान्तेः फलम्

## (जनवरी 2026)

**डॉ.खुशेन्द्रदेवचतुर्वेदी**
**सहायकप्राध्यापकः**
**ज्योतिषविभागः**
**महर्षिमहेशयोगीवैदिकविश्वविद्यालयः**
**करौंदी, कटनी, मध्यप्रदेशः**

मकरसंक्रान्तिः भारते अत्यन्तं प्रसिद्धं महत्वपूर्णं च पर्व अस्ति। एतत् पर्व जनाः उत्साहेन आचरन्ति। अस्मिन् दिने भगवान् सूर्यः पूज्यते। सूर्यदेवाय गुडखिचरी, रेवडी इत्यादीनि अर्प्यन्ते।
पञ्चाङ्गानुसारं माघकृष्णैकादशी तिथौ बुधवासरे दिनाङ्के 14 जनवरी, अपराह्ने 3:07 वादने सूर्यदेवः मकरराशौ प्रवेशं करिष्यति। अस्यां संक्रान्तौ पुण्यकालः प्रातः 8:40 वादनात् सायं 5:50 वादनपर्यन्तं भविष्यति।
एषा मकरसंक्रान्तिः बैगवाहनेन आगच्छति। मन्दाकिनीयोगात् आगामिमासः राजकीय अधिकारीणां राजनीतिज्ञानां च कृते शुभफलप्रदः उन्नतिकारकश्च भविष्यति।
संक्रान्तिप्रवेशकाले बालवकरणयोगः अस्ति। संक्रान्तिः अश्ववाहनेन



आगच्छति, कुङ्कुमलेपनयुक्ता, पीतवस्त्रधारिणी, चमेलीपुष्पमालां धारयन्ती, हस्ते गदां धारयन्ती, रजतपात्रे क्षीरान्नं भुञ्जाना, उपविष्टावस्थायां कुमारीरूपेण दिनस्य तृतीयभागे प्रवेशं करिष्यति।अतः आगामिमासः व्यापारीणां उद्योगपतिनां च कृते सावधानतासूचकः भविष्यति। विशेषतः अस्त्र-शस्त्र-व्यवसायिनां वस्त्रव्यवसायिनां च कृते कालः कष्टपूर्णः भविष्यति।
अशुभफलनिवारणाय संक्रान्तिकाले स्थित्वा सूर्यदेवाय जलं दत्त्वा सप्तवारं नमस्कारः करणीयः।मकरसंक्रान्तेः त्रिंशन्मूर्तियोगात् धान्यादीनां मूल्यानि किञ्चित् घटिष्यन्ति, अनन्तरं स्थिरता भविष्यति।मकरसंक्रान्तौ शुभफलप्राप्ताराशयः अधः प्रदीयन्ते

## १. वृषभराशिः

वृषभराशिजातकानां कृते अयं कालः शुभः भविष्यति। ये जनाः परिश्रमेण मनसा च कार्यं करिष्यन्ति, ते अवश्यं सफलतां प्राप्स्यन्ति। पारिवारिकसंबन्धेषु मधुरता भविष्यति। स्वास्थ्यं अपि समीचीनं भविष्यति।

## २. तुलाराशिः

तुलाराशिजातकानां मनोकामनाः पूर्णाः भविष्यन्ति। गृहपरिवारस्य सह सम्बन्धाः उत्तमाः भविष्यन्ति। उद्योगकामी उद्योगं प्राप्स्यति। नवकार्यप्रारम्भे सफलता भविष्यति। नवमित्राणि प्राप्स्यन्ति। सरकारतः सम्मानयोगोऽपि सम्भवति।

## ३. मीनराशिः

मीनराशिजातकानां कृते मकरसंक्रान्तिः शुभफलप्रदा भविष्यति। धनलाभस्य योगः अस्ति। नवकार्यप्राप्तिः सम्भवति। गृहसमस्याः रोगाश्च शनैः नश्यन्ति। मित्रैः सह समयव्यतीतस्य अवसराः भविष्यन्ति। भविष्ययोजनानिर्माणे सक्रियता भविष्यति। व्यापारक्षेत्रे अंशबाजारे च लाभसंकेताः सन्ति। स्वास्थ्यं अपि उत्तमं भविष्यति।